# shrIgurustotram

# શ્રીગુરુસ્તોત્રમ્

## Document Information

Text title : gurustotra from parameshvaratantra

File name : gurustotraparameshvaratantra.itx

Category : deities_misc, gurudev

Location : doc_deities_misc

Author : Traditional

Proofread by : Nat Natarajan nat.natarajan at gmail.com, NA

Source : Brihadvijnana Parameshvaratantra

Latest update : January 4, 2015

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીગુરુસ્તોત્રમ્

બૃહદ્વિજ્ઞાન પરમેશ્વરતન્ત્રાર્ગતમ્

॥ ૐ નમઃ શ્રીનાથાય ॥

॥ શ્રીમહાદેવ્યુવાચ ॥

ગુરોરર્મન્ત્રસ્ય દેવસ્ય ધર્મસ્ય તસ્ય એવ વા ।
વિશેષસ્તુ મહાદેવ! તદ્ વદસ્વ દયાનિધે ॥

॥ શ્રીમહાદેવ ઉવાચ ॥

જીવાત્મનં પરમાત્મનં દાનં ધ્યાનં યોગો જ્ઞાનમ્ ।
ઉત્કલકાશીગઙ્ગામરણં ન ગુરોરધિકં ન ગુરોરધિકમ્ ॥ ૧॥

પ્રાણં દેહં ગેહં રાજ્યં સ્વર્ગં ભોગં યોગં મુક્તિમ્ ।
ભાર્યામિષ્ટં પુત્રં મિત્રં ન ગુરોરધિકં ન ગુરોરધિકમ્ ॥ ૨॥

વાનપ્રસ્થં યતિવિધધર્મં પારમહંસ્યં ભિક્ષુકચરિતમ્ ।
સાધોઃસેવાં બહુસુખભુક્તિં ન ગુરોરધિકં ન ગુરોરધિકમ્॥ ૩॥

વિષ્ણોભક્તિં પૂજનરક્તિં વૈષ્ણવસેવાં માતરિભક્તિમ્ ।
વિષ્ણોરિવ પિતૃસેવનયોગં ન ગુરોરધિકં ન ગુરોરધિકમ્ ॥ ૪॥

પ્રત્યાહારં ચેન્દ્રિયયજનં પ્રાણાયામં ન્યાસવિધાનમ્ ।
ઇષ્ટે પૂજા જપ તપભક્તિર્ન ન ગુરોરધિકં ન ગુરોરધિકમ્ ॥ ૫॥

કાલી દુર્ગા કમલા ભુવના ત્રિપુરા ભીમા બગલા પૂર્ણા ।
શ્રીમાતઙ્ગી ધૂમા તારા ન ગુરોરધિકં ન ગુરોરધિકમ્ ॥ ૬॥

માત્સ્યં કૌર્મં શ્રીવારાહં નરહરિરૂપં વામનચરિતમ્ ।
નરનારાયણચરિતં યોગં ન ગુરોરધિકં ન ગુરોરધિકમ્ ॥ ૭॥

શ્રીભૃગુદેવં શ્રીરઘુનાથં શ્રીયદુનાથં બૌદ્ધં કલ્ક્યમ્ ।

અવતારા દશ વેદવિધાનં ન ગુરોરધિકં ન ગુરોરધિકમ્ ॥ ૮॥

ગઙ્ગા કાશી કાઞ્ચી દ્વારા માયાઽયોધ્યાઽવન્તી મથુરા ।
યમુના રેવા પુષ્કરતીર્થં ન ગુરોરધિકં ન ગુરોરધિકમ્ ॥ ૯॥

ગોકુલગમનં ગોપુરરમણં શ્રીવૃન્દાવનમધુપુરરટનમ્ ।
એતત્ સર્વંસુન્દરિ! માતર્ન ગુરોરધિકં ન ગુરોરધિકમ્ ॥ ૧૦॥

તુલસીસેવા હરિહરભક્તિઃ ગઙ્ગાસાગરસઙ્ગમમુક્તિઃ ।
કિમપરમધિકં કૃષ્ણેભક્તિર્ન ગુરોરધિકં ન ગુરોરધિકમ્ ॥ ૧૧॥

એતત્સોત્રં પઠતિ ચ નિત્યં મોક્ષજ્ઞાની સોઽપિ ચ ધન્યમ્ ।
બ્રહ્માણ્ડાન્તર્યદ્યદ્ધ્યેયં ન ગુરોરધિકં ન ગુરોરધિકમ્ ॥ ૧૨॥

॥ બૃહદ્વિજ્ઞાન પરમેશ્વરતન્ત્રે ત્રિપુરાશિવસંવાદે શ્રીગુરોઃસ્તોત્રમ્ ॥

Proofread by Nat Natarajan nat.natarajan at gmail.com, NA

*shrIgurustotram*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*